३. मनमा कर्णाभ्यां भूरिविश्रुवं ब्रह्मणः कोशो सिमे धयापिहितः श्रुतंमेगोपाय॥ आवहंतीवित
२ न्वानाकुर्वाणा चीरमात्मनः वासांसिममगावश्च अन्नपानेचसर्वदा ततोमेश्रियमावहलोमशां
पशुभिःसहस्वाहा आमायंतुब्रह्मचारिणःस्वाहा विमायंतुब्रह्मचारिणःस्वाहा प्रमायंतुब्रह्मचा
रिणःस्वाहा दमायंतुब्रह्मचारिणःस्वाहा शमायंतुब्रह्मचारिणःस्वाहा यशोजनेसानिश्रेया स्वाहा
नस्यसोसानिस्वाहा तंत्वाभगप्रविशानिस्वाहा समाभगप्रविशस्वाहा तस्मिन्सहस्रशाखेनिभ भग
गाहंत्वयिमृजेस्वाहा यथापःप्रवतायंतियथामासाअहर्जरं एवंमांब्रह्मचारिणोधातरायंतुस
४ र्वतःस्वाहा प्रतिवेशोसिप्रमाभाहिप्रमापद्यस्व इतिचतुर्थोनुवाकः भूर्भुवःसुवरितिवाएतास्तिस्रो
व्याहृतयः तासामुहस्मैतांचतुर्थीम्माहाचमस्यःप्रवेदयतेमहइतितद्ब्रह्मसआत्माअंगान्यन्यादेवताः
भूरितिवाअयंलोकः भुवइत्यंतरिक्षं सुवरित्यसौलोकः महइत्यादित्यः आदित्येनवावसर्वेलोका
महीयंते भूरितिवाअग्निः भुवइतिवायुः सुवरित्यादित्यः महइतिचंद्रमाः चंद्रमसावावसर्वाणि
ज्योतींषिमहीयंते भूरितिवाऋचः भुवइतिसामानि सुवरितियजूंषिमहइतिब्रह्म ब्रह्मणा
वावसर्वेवेदामहीयंते भूरितिवैप्राणः भुवइत्यपानः सुवइतिव्यानः महइत्यन्नं अन्नेनवावस
र्वेप्राणामहीयंते तावाएताश्चतस्रश्चतुर्धा चतस्रश्चतस्रोव्याहृतयः तायोवेदसवेदब्रह्म सर्वेस्मै

ॐ श्रीरामाय नमः ॐ शंन्नो मित्रः शं वरुणः शंन्नो भवत्वर्यमा शंन्न इंद्रो बृहस्पतिः शंन्नो विष्णुरुरुक्रमः
नमो ब्रह्मणे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि ऋतं वदिष्यामि सत्यं व
दिष्यामि तन्मामवतु तद्वक्तारमवतु अवतु मामवतु वक्तारं ॐ शांतिः शांतिः शांतिः श्रीः शी
क्षां व्याख्यास्यामः वर्णः स्वरः मात्रा बलं साम संतानः इत्युक्तः शीक्षाध्यायः सह नौ यशः सह नौ ब्रह्म
वर्चसं अथातः संहिताया उपनिषदं व्याख्यास्यामः पंचस्वधिकरणेषु अधिलोकमधिज्यौ
तिषमधिविद्यमधिप्रजमध्यात्मं ता महासंहिता इत्याचक्षते अथाधिलोकं पृथिवी पूर्वरूपं द्यौ
रुत्तररूपं आकाशः संधिः वायुः संधानं इत्यधिलोकं अथाधिज्यौतिषं अग्निः पूर्वरूपं आदित्य उत्त
ररूपं आपः संधिः वैद्युतः संधानं इत्यधिज्यौतिषं अथाधिविद्यं आचार्यः पूर्वरूपं अंतेवास्युत्तररू
पं विद्या संधिः प्रवचनं संधानं इत्यधिविद्यं अथाधिप्रजं माता पूर्वरूपं पितोत्तररूपं प्रजा संधिः
प्रजननं संधानं इत्यधिप्रजं अथाध्यात्मं अधराहनुः पूर्वरूपं उत्तराहनुरुत्तररूपं वाक्संधिः
जिह्वा संधानं इत्यध्यात्मं इतीमा महासंहिताः य एवमेता महासंहिता व्याख्याता वेद संधीयते प्रज
या पशुभिः ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन यश्छंदसामृषभो विश्वरूपः छंदोभ्योऽध्यमृता
त्संबभूव स मेंद्रो मेधया स्पृणोतु अमृतस्य देव धारणो भूयासं शरीरं मे विचर्षणं जिह्वा मे मधु

पु०
२

ग्निहोत्रंचस्वाध्यायप्रवचनेच अतिथयश्चस्वाध्यायप्रवचनेच मानुषंचस्वाध्यायप्रवचनेच प्रजाचस्वा
ध्यायप्रवचनेच [illegible] प्रजनश्चस्वाध्यायप्रवचनेच प्रजातिश्चस्वाध्या
यप्रवचनेच सत्यमितिसत्यवचाराथीतरः तपइतितपोनित्यःपौरुशिष्टिः स्वाध्यायप्रवचने एवेति
नाकोमौद्गल्यः तद्धितपस्तद्धितपः इतिनवमोनुवाकः अहंवृक्षस्यरेरिवाकीर्तिःपृष्ठंगिरेरिव ऊर्ध्वपवि
त्रोवाजिनीवस्वमृतमस्मिद्रविणंसवर्चसंसुमेधा अमृतोक्षितः इतित्रिशंकोर्वेदानुवचनं [illegible]
[illegible] इतिदशमोनुवाकः वेदमनूच्याचार्योन्तेवासिनमनुशास्तिसत्यंवदधर्मंचरस्वाध्यायान्माप्रमदः धर्मान्नप्रम
आचार्यायप्रियंधनमाहृत्यप्रजातन्तुंमाव्यवच्छेत्सीः सत्यान्नप्रमदितव्यं कुशलान्नप्रमदितव्यं भू दितव्यं
त्यैनप्रमदितव्यं स्वाध्यायप्रवचनाभ्यांनप्रमदितव्यं देवपितृकार्याभ्यांनप्रमदितव्यं मातृदेवोभवपि
तृदेवोभव आचार्यदेवोभव अतिथिदेवोभव यान्यनवद्यानिकर्माणितानिसेवितव्यानि नोइतरा
णियान्यस्माकंसुचरितानितानित्वयोपास्यानि नोइतराणि येकेचास्मच्छ्रेयांसोब्राह्मणाः
तेषांत्वयासनेनप्रश्वसितव्यं श्रद्धयादेयं अश्रद्धयादेयं श्रियादेयं ह्रियादेयं भियादेयं संविदादेयं २
अथयदितेकर्मविचिकित्सा [illegible] वास्यात् येतत्रब्राह्मणाःसंमर्शिनः युक्ताआयुक्ता
अलूक्षाधर्मकामाःस्युः यथातेतत्रवर्तेरन् [illegible] तथातत्रवर्तेथाः अथाभ्याख्यातेषु

वृत्तिविचिकित्सा

देवाबलिमावहंति इतिपंचमोनुवाकः सयएषोंतर्हृदयाकाशः तस्मिन्नयंपुरुषोमनोमयः अमृ
तोहिरण्मयः अंतरेणतालुकेयएषस्तन इवावलंबतेसेंद्रयोनिः यत्रासौकेशांतोविवर्ततेव्यपोह्यशी
र्षकपाले भूरित्यग्नौप्रतितिष्ठति भुवइतिवायौ सुवरित्यादित्ये महइतिब्रह्मणि आप्नोतिस्वाराज्यंआप्नोतिम
नसस्पतिं वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिरेतत्ततोभवति आकाशशरीरंब्रह्म सत्यात्मप्रा
णारामंमनआनंदं शांतिसमृद्धममृतं इतिप्राचीनयोग्योपास्व इतिषष्ठोनुवाकः पृथिव्यंतरिक्षं
द्यौर्दिशोवांतरदिशः अग्निर्वायुरादित्यश्चंद्रमानक्षत्राणि आपओषधयोवनस्पतयआकाशआत्मा
इत्यधिभूतं अथाध्यात्मं प्राणोव्यानोपानउदानः समानः चक्षुःश्रोत्रंमनोवाक्त्वक् चर्ममांसंस्ना
वास्थिमज्जा एतदधिविधायऋषिरवोचत् पांक्तंवाइदंसर्वंपांक्तेनैवपांक्तंस्पृणोतीति इतिस
प्तमोनुवाकः ओमितिब्रह्म ओमितीदंसर्वं ओमित्येतदनुकृतिर्हस्मवा अप्योश्रावयेत्याश्रावयंति
शो४ ओमितिसामानिगायंति ओंशोमितिशस्त्राणिशंसंति ओमित्यध्वर्युःप्रतिगरंप्रतिगृणाति ओमितिब्र
ह्माप्रसौति ओमित्यग्निहोत्रमनुजानाति ओमितिब्राह्मणःप्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति ब्रह्मैवोपाप्नो
ति इत्यष्टमोनुवाकः ऋतंचस्वाध्यायप्रवचनेच सत्यंचस्वाध्यायप्रवचनेच तपश्चस्वाध्या
यप्रवचनेच दमश्चस्वाध्यायप्रवचनेच शमश्चस्वाध्यायप्रवचनेच अग्नयश्चस्वाध्यायप्रवचनेच अ

समयात् अन्योंतर आत्मा प्राणमयः तेनैष पूर्णः स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पु उ.
रुषविधः तस्य प्राण एव शिरः व्यानो दक्षिणः पक्षः अपान उत्तरः पक्षः आकाश आत्मा पृथिवी पुच्छं प्र २
तिष्ठा तदप्येष श्लोको भवति प्राणं देवा अनुप्राणंति मनुष्याः पशवश्च ये प्राणो हि भूतानामायुः
तस्मात्सर्वायुषमुच्यते सर्वमेव त आयुर्यंति ये प्राणं ब्रह्मोपासते प्राणो हि भूतानामायुः तस्मात्स
र्वायुषमुच्यत इति तस्यैष एव शारीर आत्मा यः पूर्वस्य तस्माद्वा एतस्मात्प्राणमयात् अन्योंतर आ
त्मा मनोमयः तेनैष पूर्णः स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविधः तस्य पु
अ२ यजुरेव शिरः ऋग्दक्षिणः पक्षः सामोत्तरः पक्षः आदेश आत्मा अथर्वांगिरसः पुच्छं प्रतिष्ठा तदप्ये
ष श्लोको भवति यतो वाचो निवर्तंते अप्राप्य मनसा सह आनंदं ब्रह्मणो विद्वान् न बिभेति कदाचने
ति तस्यैष एव शारीर आत्मा यः पूर्वस्य तस्माद्वा एतस्मान्मनोमयात् अन्योंतर आत्मा विज्ञानमयः
तेनैष पूर्णः स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविधः तस्य श्रद्धैव शिरः ऋ
तं दक्षिणः पक्षः सत्यमुत्तरः पक्षः योग आत्मा महः पुच्छं प्रतिष्ठा तदप्येष श्लोको भवति विज्ञानं यज्ञं
तनुते कर्माणि तनुतेपि च विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते विज्ञानं देवाः सर्वे ब्रह्म ज्ये ३
ष्ठ विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति शरीरे पाप्मनो हित्वा सर्वान्कामान्समश्नुत इति

येतत्रब्राह्मणाः संमर्शिनः युक्ता आयुक्ता अलूक्षा धर्मकामाः स्युः यथा ते तेषु वर्तेरन् तथा तेषु वर्तेथाः
एष आदेशः एषा वेदोपनिषत् एतदनुशासनं एवमुपासितव्यं एवमु चैतदुपास्यं शन्नो मित्रः शं
वरुणः शन्नो भवत्वर्यमा शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः नमो ब्रह्मणे नमस्ते वायो त्वमेव प्रत्य
क्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्मावादिषं ऋतमवादिषं सत्यमवादिषं तन्मामावीत् तद्वक्तारमावीत् आवी
न्मां आवीद्वक्तारं ॐ शान्तिः ३ इति शीक्षावल्ली १ सहनाववतु सहनौ भुनक्तु सहवीर्यं करवावहै ते
जस्विनावधीतमस्तु मा विद्विषावहै ॐ शान्तिः ३ ॐ ब्रह्मविदाप्नोति परं तदेषाभ्युक्ता सत्यं ज्ञानमनन्तं
ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति तस्माद्वा एत ९३
स्मादात्मनः आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओ
षधीभ्योऽन्नं अन्नात्पुरुषः स वा एष पुरुषोऽन्नरसमयः तस्येदमेव शिरः अयं दक्षिणः पक्षः अयमु ८५
त्तरः पक्षः अयमात्मा इदं पुच्छं प्रतिष्ठा तदप्येष श्लोको भवति अन्नाद्वै प्रजाः प्रजायन्ते याः काश्च पृ
थिवीं श्रिताः अथो अन्नेनैव जीवन्ति अथैनदपि यन्त्यन्ततः अन्नं हि भूतानां ज्येष्ठं तस्मात्सर्वौष
धमुच्यते सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासते अन्नं हि भूतानां ज्येष्ठं तस्मात्सर्वौषधमुच्यते अन्नाद्
भूतानि जायन्ते जातान्यन्नेन वर्धन्ते अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते इति २ तस्माद्वा एतस्मादन्नर

उः ति सैषानंदस्य मीमांसा भवति युवा स्यात्साधुयुवाध्यायकः आशिष्ठो दृढिष्ठो बलिष्ठः तस्येयं पृ
४ थिवी सर्वा वित्तस्य पूर्णा स्यात् स एको मानुष आनंदः ते ये शतं मानुषा आनंदाः स एको मनु
ष्यगंधर्वाणामानंदः श्रोत्रियस्य चाकामहतस्य ते ये शतं मनुष्यगंधर्वाणामानंदाः स एको दे
वगंधर्वाणामानंदः श्रोत्रियस्य चाकामहतस्य ते ये शतं देवगंधर्वाणामानंदाः स एकः पितॄणां
चिरलोकलोकानामानंदः श्रोत्रियस्य चाकामहतस्य ते ये शतं पितॄणां चिरलोकलोकानामा
नंदाः स एको मनुष्यगंधर्वाणामानंदः श्रोत्रियस्य चाकामहतस्य ते ये शतं मनुष्यगंधर्वाणा
मानंदः श्रोत्रियस्य चाकामहतस्य ते ये शतं मनुष्यगंधर्वाणामानंदः स एको देवगंधर्वा
णामानंदः श्रोत्रियस्य चाकामहतस्य ते ये शतं देवगंधर्वाणामानंदाः स एकः पितॄणां चिरलो
कलोकानामानंदः श्रोत्रियस्य चाकामहतस्य ते ये शतं पितॄणां चिरलोकलोकानामानंदाः स
एक आजानजानां देवानां स एक आजानजानां देवानामानंदः श्रोत्रियस्य चाकामहतस्य ते ये शतमा
जानजानां देवानामानंदाः स एकः कर्मदेवानां देवानामानंदः ये कर्मणा देवानपियंति श्रोत्रियस्य च ५
अकामहतस्य ते ये शतं कर्मदेवानां देवानामानंदाः स एको देवानामानंदः श्रोत्रियस्य चाकामह
तस्य ते ये शतं देवानामानंदाः स एक इंद्रस्यानंदः श्रोत्रियस्य चाकामहतस्य ते ये शतमिंद्रस्या

देवाना३

तस्यैष एव शारीर आत्मा यः पूर्वस्य तस्माद्वा एतस्माद्विज्ञानमयात् अन्योऽन्तर आत्मानंदमयस्तेनैष
पूर्णः स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविधः तस्य प्रियमेव शिरः मोदो दक्षि
णः पक्षः प्रमोद उत्तरः पक्षः आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठा तदप्येष श्लोको भवति असन्नेव स भवति अ
सद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुरिति तस्यैष एव शारीर आत्मा यः पूर्वस्य अथा
तोऽनुप्रश्नाः उताविद्वानमुं लोकं प्रेत्य कश्चन गच्छती३ आहो विद्वानमुं लोकं प्रेत्य कश्चित्समश्नुता३
उ सोऽकामयत बहु स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंच तत्सृष्ट्वा तदे
वानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं चाविज्ञानं च विज्ञानं च निलयनं च
सत्यं चानृतं च सत्यमभवत् यदिदं किंच तत्सत्यमित्याचक्षते तदप्येष श्लोको भवति असद्वा इदमग्र आसी
त् ततो वै सदजायत तदात्मानं स्वयमकुरुत तस्मात्तत्सुकृतमुच्यत इति यद्वै तत्सुकृतं रसो वै सः
रसं ह्येवायं लब्ध्वानंदी भवति को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् एष ह्येवा
नंदयाति यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते अथ सोऽभयं गतो भ
वति यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवति तत्त्वेव भयं विदुषोऽमन्वानस्य तदप्ये
ष श्लोको भवति भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इ

उ०
५

रेव तेजो गच्छति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यच्चक्षुषा पश्यत्यथैतन्म्रियते यन्न पश्यति तस्य श्रोत्रमेव ते
जो गच्छति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यच्छ्रोत्रेण शृणोत्यथैतन्म्रियते यन्न शृणोति तस्य मन एव तेजो
गच्छति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यन्मनसा ध्यायत्यथैतन्म्रियते यन्न ध्यायति तस्य प्राणमेव तेजो
गच्छति प्राणं प्राणं ता वा एताः सर्वा देवताः प्राणमेव प्रविश्य प्राणे मृत्वा न मूर्च्छन्ते तस्मादेव पुनरु
दीरते तद्यदि ह वा एवं विद्वांसमुभौ पर्वतावभिप्रवर्त्तेयातां दक्षिणश्चोत्तरश्च तुस्तूर्षमाणो न हैनं स्तृ
ण्वीयातामथ य एनं द्विषंति यांश्च स्वयं द्वेष्टि त एवैनं परितो म्रियंते ॥ १३ ॥ अथातो निःश्रेयसादान
मेता ह वै देवता अहं श्रेयसे विवदमाना अस्माच्छरीरादुच्चक्रमुस्तद्दारुभूतं शिश्ये
थैतद्वाक् प्रविवेश तद्वाचा वदच्छिश्य एवाथैतच्चक्षुः प्रविवेश तद्वाचा वदच्चक्षुषा पश्यच्छिश्य एवाथै
तच्छ्रोत्रं प्रविवेश तद्वाचा वदच्चक्षुषा पश्यच्छ्रोत्रेण शृण्वच्छिश्य एवाथैतन्मनः प्रविवेश तद्वाचा
वदच्चक्षुषा पश्यच्छ्रोत्रेण शृण्वन्मनसा ध्यायच्छिश्य एवाथैतत्प्राणः प्रविवेश तत्तत एव समु
त्तस्थौ ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वा प्राणमेव प्रज्ञात्मानमभिसंभूय सहैवै
तैः सर्वैरस्माच्छरीरादुच्चक्रमुस्ते वायुप्रतिष्ठा आकाशात्मानः स्वरीयुस्तथो एवैवं विद्वान्प्राणे निः
श्रेयसं विदित्वा प्राणमेव प्रज्ञात्मानमभिसंभूय सहैवैतैः सर्वैरस्माच्छरीरादुत्क्रामति स वायुप्रति

प

इति न प्रस्याः सर्वाः प्रजाः प्रैतीति ९ अथ प्रोष्यायन्पुत्रस्य मूर्द्धानमभिजिघ्रेत् अंगादंगात्संभवसि
हृदयादधिजायसे आत्मा वै पुत्रनामासि स जीव शरदः शतमिति नामास्य दधात्यश्मा भव पर
शुर्भव हिरण्यमस्तृतं भव वेदो वै पुत्रनामासि स जीव शरदः शतमिति नामास्य गृह्णात्यथैन
मभिमृशति येन प्रजापतिः प्रजाः पर्यगृह्णादरिष्ट्यै तेन त्वा परिगृह्णाम्यसाविन्यथास्य दक्षिणे
द्रश्रेष्ठानि कर्णे जपत्यस्मे प्रयंधि मघवन्नृजीषिन्नित्री [illegible] द्रविणानि धेहीति सव्ये मा छित्था मा व्यथिष्ठाः भे५
शतं शारद आयुषो जीव स्व पुत्र ते नाम्ना मूर्द्धानमभिजिघ्रामीति त्रिरस्य मूर्द्धानमभिजिघ्रेद्गवां
त्वा हिंकारेणाभिहिंकरोमीति त्रिरस्य मूर्द्धानमभिहिंकुर्यात् ११ अथातो दैवः परिमर एतद्वै ब्रह्म
दीप्यते यदग्निर्ज्वलत्यथैतन्म्रियते यन्न ज्वलति तस्यादित्यमेव तेजो गच्छति वायुं प्राणः एतद्वै ब्रह्म दी
प्यते यदादित्यो दृश्यतेऽथैतन्म्रियते यन्न दृश्यते तस्य चन्द्रमसमेव तेजो गच्छति वायुं प्राणः एतद्वै
ब्रह्म दीप्यते यच्चन्द्रमा दृश्यतेऽथैतन्म्रियते यन्न दृश्यते तस्य विद्युतमेव तेजो गच्छति वायुं प्राणः
एतद्वै ब्रह्म दीप्यते यद्विद्युद्विद्योततेऽथैतन्म्रियते यन्न विद्योतते तस्या दिश एव तेजो गच्छति वायुं
प्राणस्ता वा एताः सर्वा देवता वायुमेव प्रविश्य वायौ सृप्ता न मूर्छन्ते तस्मादेव पुनरुदीरत इ
त्यधिदैवतमथाध्यात्मम् १२ एतद्वै ब्रह्म दीप्यते यद्वाचा वदत्यथैतन्म्रियते यन्न वदति तस्य चक्षु

उ

उपसंक्रम्य एतंमनोमयमात्मानमुपसंक्रम्य एतंविज्ञानमयमात्मानमुपसंक्रम्य एतमानंदमयमात्मान
मुपसंक्रम्य इमान्लोकान्कामान्नीकामरूप्यनुसंचरन् एतत्सामगायन्नास्ते हा३वु हा३वु हा३वु अहमन्न
महमन्नमहमन्नं ३ अहमन्नादो३हमन्नादो३हमन्नाद ३ अहंश्लोककृत् अहंश्लोककृत् अहंश्लोककृत् अह
मस्मिप्रथमजा ऋता३स्य पूर्वंदेवेभ्योमृतस्यना३भायि योमाददातिसइदेवमा३वाः अहमन्नमन्न
मदंतमद्मि अहंविश्वंभुवनमभ्यभुवां सुवर्णज्योतिः यएवंवेद इत्युपनिषत् सहनाववतुसहनौभुन
क्तुसहवीर्यंकरवावहै तेजस्विनावधीतमस्तुमाविद्विषावहै ॐ शांतिःशांतिः इतितैत्तिरीयोपनिष
त्संपूर्णा ॥ ॥॥ शांतिः

६

कृष्णयजुर्वेदी तैत्तिरियउपनिषद पत्रे ६

सयएतदन्नमन्नेप्रतिष्ठितंवेद २

ष्ठितं प्रतितिष्ठति अन्नवानन्नादोभवतिमहान्भवति प्रजयापशुभिर्ब्रह्मवर्चसेन महान्की
र्त्या अन्नंबहुकुर्वीततद्व्रतं पृथिवीवाअन्नं आकाशोन्नादः पृथिव्यामाकाशः प्रतिष्ठितः आकाशे
पृथिवीप्रतिष्ठितातदेतदन्नमन्नेप्रतिष्ठितं सयएतदन्नमन्नेप्रतिष्ठितंवेद प्रतितिष्ठति अन्नवानन्ना
दोभवति महान्भवति प्रजयापशुभिर्ब्रह्मवर्चसेनमहान्कीर्त्यानकंचनवसतौप्रत्याचक्षीततद्व्रतं
तस्माद्ययाकयाचविधयाबह्वन्नंप्राप्नुयात् अराध्यस्मान्नमित्याचक्षते एतद्वैमुखतोन्नंराद्धं मुखतो
ग्रं १८ स्मान्नंराध्यते एतद्वैमध्यतोन्नंराद्धं मध्यतोस्मान्नंराध्यते एतद्वाअन्ततोन्नंराद्धं अन्ततोस्मा ग्रं
न्नंराध्यते यएवंवेद क्षेमइतिवाचि योगक्षेमइतिप्राणापानयोः कर्मेतिहस्तयोः गतिरिति
पादयोः विमुक्तिरितिपायौ इतिमानुषीः समाज्ञाः अथदैवीः तृप्तिरितिवृष्टौ बलमितिविद्युति
यशइतिपशुषु ज्योतिरितिनक्षत्रेषुप्रजातिरमृतमानंद इत्युपस्थे सर्वमित्याकाशे तत्प्रतिष्ठेत्यु
पासीत प्रतिष्ठावान्भवति तन्महइत्युपासीत महान्भवति तन्मनइत्युपासीत मानवान्भ
वति तन्नमइत्युपासीत नम्यन्तेस्मैकामाः तद्ब्रह्मेत्युपासीत ब्रह्मवान्भवति तद्ब्रह्मणः परिमरइत्यु
पासीत पर्येनंम्रियन्तेद्विषंतः सपत्नाः परियेऽप्रियाभ्रातृव्याः सयश्चायंपुरुषे यश्चासावादित्ये
सएकः सयएवंवित् अस्माल्लोकात्प्रेत्यएतमन्नमयमात्मानमुपसंक्रम्य एतंप्राणमयमात्मानम्